শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী অম্মাসত্রং শেষাদ্র্যাচার্য ৱিরচিতং

# ॥ শ্রী গোপালার্যমহাদেশিকমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গোপালার্যমহাদেশিকমঙ্গলম্ ॥

ৱেদান্ত লক্ষ্মণমুনিং শ্রীহযাস্যস্ৱরূপিণম্।
অণ্ণযার্যপদাম্ভোজভৃঙ্গং মদ্গুরুমাশ্রযে॥

জ্ঞানানুষ্ঠানৱৈরাগ্যনিধযে গুণসিন্ধৱে।
ত্রয্যন্তদেশিকাযাস্তু গোপালার্যায মঙ্গলম্॥ **1** ॥

ৱিক্রমে কন্যকামাসি পূর্ৱাষাঢে গুণোত্তরে।
আত্রেযকুলতুঙ্গাব্ধৌ অৱতীর্ণায মঙ্গলম্॥ **2** ॥

ত্রয্যন্তলক্ষ্মণমুনেঃ যতিশেখররূপিণঃ।
লব্ধাগমান্তযুগ্মায গোপালার্যায মঙ্গলম্॥ **3** ॥

কুম্ভঘোণাখ্যনগরং শার্ঙ্গরাজনিষেৱিতম্।
যন্নিত্যৱাসতো দিৱ্যধামভূৎ তস্য মঙ্গলম্॥ **4** ॥

শ্রীশঠারিযতীশানদেশিকাংশতযা হ্যযম্।
সংরক্ষণাযাৱতীর্ণঃ ইত্যুক্তাযাস্তু মঙ্গলম্॥ **5** ॥

শ্রীনাথযামুনাচার্য লক্ষ্মণার্যমুনিত্রযম্।
অংশেন যতিতাং প্রাপ্য যং শ্রিতং তস্য মঙ্গলম্॥ **6** ॥

রহস্যত্রযসারাব্ধি মন্থনোত্থসুধামযী।
যেন সারাস্ৱাদিনী সা রচিতা তস্য মঙ্গলম্॥ **7** ॥

সর্ৱচেতনসর্ৱার্থ সিদ্ধিদো যেন নির্মিতঃ।
নিক্ষেপচিন্তামণিরাট্ তস্মৈ সেৱ্যায মঙ্গলম্॥ **8** ॥

আহ্নিক ধ্যানসোপান দশনির্ণযকারিণে।
হৃৎপদ্মস্থশ্রীহযাস্য পদহংসায মঙ্গলম্॥ **9**॥

ত্রযী চূডার্যনাম্নাং যঃ সহস্রমকরোদ্গুরুঃ।
ৱিষ্ণুচিত্তাদিগাথার্থ দাযিনস্তস্য মঙ্গলম্॥ **10**॥

যৎসম্প্রদাযনিষ্ণাতাঃ জ্ঞানানুষ্ঠানরাশযঃ।
পৱিত্রযন্তি গুরৱো লোকাংস্তস্যাস্তু মঙ্গলম্॥ **11**॥

যশস্সৎকার লাভেচ্ছা ৱর্জিতো ভগৱজ্জনে।
নিত্যদাসো নির্মমো যঃ সর্ৱজ্ঞস্তস্য মঙ্গলম্॥ **12**॥

গার্হস্থ্যে প্রাপ্তৱেদান্ত পরমৈকান্তিনাং মুদে।
চরমে হংসতাং প্রাতো যস্তস্মৈ মঙ্গলং সদা॥ **13**॥

যো কীর্তযন্তি শেষাদ্রিৱর্যোক্তং মঙ্গলং ৎৱিদম্।
তেষাং নিত্যমঙ্গলং স দদ্যাৎ গোপালদেশিকঃ॥ **14**॥

মুনিত্রয নমস্কৃতে নিখিললোক সঞ্জীৱন -
ত্রযীমকুট দেশিক প্রৱর দিৱ্য রূপে গুরৌ।
উদারগুণসাগরে কলিতমিস্রহৃৎভাস্করে
রতির্মম সদা ভৱৎৱমিতভূম্নি গোপালকে॥ **15**॥

শ্রীমান্ গোপালসূরির্হযৱদন কৃপা -
লম্ভিতাশ্চর্যভূমা -
প্রজ্ঞাচারিত্রশান্তিপ্রভৃতি কুসুমস -
ন্তানকল্পদ্রুমঃ স্তাৎ।
ত্রয্যন্তার্যাৱতারঃ সকলনতজনো -
জ্জীৱনে বদ্ধ দীক্ষঃ

যচ্ছন্ ত্রিভ্যো মুনিভ্যো শ্রুতিমকুটগুরোঃ
সংপ্রদাযং শ্রিযৈ নঃ ॥ **16** ॥

শ্রীমুনিত্রয সিদ্ধান্ত পদ্মিন্যুল্লাসভাস্করঃ।
গোপালদেশিকঃ শ্রীমান্ জেজীযাৎ সন্ততং ভুৱি ॥ **17** ॥

॥ ইতি শ্রী গোপালার্যমহাদেশিকমঙ্গলং সমাপ্তম্ ॥